# प्रादर्श प्रश्न-पत्र ( सेट – A )
## कक्षा – 10वीं
## विषय – संस्कृत

समय : 3 घण्टे पूर्णांक : 75

निर्देश: – 1. सर्वे प्रश्ना: अनिवार्या: सन्ति।
2. प्रश्नानां सम्मुखे अङ्का: प्रदत्ता:।

**प्रश्न 1. उचित विकल्पं चित्वा लिखत –** 6

( क ) बालका: ......... गृहम् आगच्छन्ति।
(अ) पाठशालया (ब) पाठशालायाम्
(स) पाठशालाया: (द) पाठशालाम्

उत्तरम् – (ब) पाठशालायाम्

( ख ) ........... उपवने पुष्पाणि विकसन्ति।
(अ) तेन (ब) तस्मिन्
(स) तस्मै (स) तम्

उत्तरम् – (ब) तस्मिन्

( ग ) वृक्षेषु मधुराणि ............ उद्भवन्ति।
(अ) फले (ब) फलाय
(स) फलानि (द) फलानाम्

उत्तरम् – (स) फलानि

( घ ) 'युष्मद्' शब्दस्य षष्ठी, एकवचनं रूपं अस्ति –
(अ) त्वया (ब) तुभ्यम्
(स) तव (द) युष्मास्द

उत्तरम् – (स) तव

( ङ ) 'मितं च सारं च वचोहि वाग्मिता' अत्र अव्ययम् अस्ति –
(अ) सारम् (ब) हि
(स) मितम् (द) च उत्तरम् – (द) च

( च ) अधोलिखितेषु अव्ययं नास्ति –
(अ) अत्र (ब) तत्र
(स) कुत्र (द) पुत्र:

उत्तरम् – (द) पुत्र:

**प्रश्न 2. उचित विकल्पं चित्वा रिक्तस्थानानि पूरयत् –** 6

(क) यौवनम् पदे विलोम पदं ............. अस्ति। (जरा/अधुना)

(ख) 'विशाल: वृक्ष:' इति पदयो: ........... विशेषण पदमस्ति। (वृक्ष:/विशाल:)

(ग) वनम् पदे पर्याय पदं ............ अस्ति। (काननम्/भार्या)

(घ) आम्रम् पदे पर्याय पदं ............ अस्ति। (रसालम्/वक्रम्)

(ङ) 'स: चञ्चल: बालक: अस्ति' इत्यस्मिन् वाक्ये ............ विशेषण पदमस्ति। (बालक:/चञ्चल:)

(च) शुचि पदे विलोम पदं ............ अस्ति। (श्राप:/अशुचि)

उत्तरम् – (क) जरा, (ख) विशाल:, (ग) काननम्, (घ) रसालम्, (ङ) चञ्चल:, (च) अशुचि।

**प्रश्न 3. शुद्ध वाक्यानां समक्षं आम् अशुद्ध वाक्यानां समक्षं न इति लिखत –** 6

(क) 'इत्यादि' यण सन्धे: उदाहरणम् अस्ति।
(ख) 'दिग्गज:' इत्यस्मिन् पदे व्यञ्जन सन्धि: अस्ति।
(ग) तवल्कार: इत्यस्य संधि विच्छेद: 'तव + अल्कार:' अस्ति।
(घ) तत्पुरुष समासस्य उदाहरणम् चौरभयम् अस्ति।
(ङ) 'पितरौ' इत्यस्मिन् पदे समास विग्रह: माता च पिता च भवति।
(च) 'रामलक्ष्मणौ' इत्यस्मिन् पदे द्विगु: समास: अस्ति।

उत्तरम् – (क) आम्, (ख) आम्, (ग) न, (घ) आम्, (ङ) आम्, (च) न।

**प्रश्न 4. युग्ममेलनम् कुरुत –** 6

| ( अ ) | ( ब ) |
|---|---|
| (क) ददति | (i) लङ्लकार: |
| (ख) भविष्यत: | (ii) अधि |
| (ग) द्रक्ष्यति | (iii) निर् |
| (घ) अभवत् | (iv) दृश् |
| (ङ) अधिकार: पदे उपसर्ग: अस्ति | (v) प्रथमपुरुष: |
| (च) निर्धन: पदे उपसर्ग: अस्ति | (vi) बहुवचनम् |
| | (vii) एकवचनम् |
| | (viii) लृटलकार: |

उत्तरम् – (क) – (vi), (ख) – (v), (ग) – (iv), (घ) – (i), (ङ) – (ii), (च) – (iii)।

**प्रश्न 5. अधोलिखित प्रश्नानां उत्तराणि एकपदेन/एकवाक्येन लिखत –** 6

(क) 'क्तवतु' प्रत्ययस्योदाहरणम् क: अस्ति ?
(ख) 'इतिहास + ठक्' इत्यस्य पदम् क: भविष्यति ?
(ग) 'कोकिला' इत्यस्मिन् पदे क: प्रत्यय: अस्ति ?
(घ) वृषभ: कुत्र पपात ?
(ङ) केन सम्बन्धेन बाल्मीकि: लवकुशयो: गुरु: ?
(च) गुणी किं वेत्ति ?

उत्तरम् – (क) पठितवान, (ख) ऐतिहासिक, (ग) टाप्, (घ) क्षेत्रे, (ङ) उपनयनोदेशेन, (च) गुणं।

**प्रश्न 6. कविः किमर्थं प्रकृतेः शरणम् इच्छति?** 2

उत्तरम् – धरातले जीवितं दुर्वहम् जातं अतः कविः शुद्धपर्यावरणाय प्रकृतेः शरणम् इच्छति।

**अथवा**

**जम्बुकः किं वदन् व्याघ्रस्य उपहासं करोति?**

उत्तरम् – ''व्याघ्र! त्वया महत्वकौतुकम् आवेदिंत यन्मानुषादपि विभेषि?'' इति वदन् जम्बुकः व्याघ्रस्य उपहासं करोति।

**प्रश्न 7. कुशलवयोः मातरं वाल्मीकिः केन नाम्ना आह्वयति?** 2

उत्तरम् – कुशलवयोः मातरं वाल्मीकिः 'वधू' इति नाम्ना आह्वयति।

**अथवा**

**कृपकः किं करोति स्म?**

उत्तरम् – कृपकः बलीवर्दाभ्यां क्षेत्रकर्पणं करोति स्म।

**प्रश्न 8. नराणां प्रथमः शत्रुः कः?** 2

उत्तरम् – नराणां प्रथमः शत्रुः क्रोधः।

**अथवा**

**निःसंशयं कः कृतान्तः मन्यते ?**

उत्तरम् – यः अपरैः वित्रस्तान् पीड्यमानान् जन्तून् सदा न रक्षति पार्थिवरूपेण सः निसंशय कृतान्तः मन्यते।

**प्रश्न 9. निर्धनः जनः कथं वित्तम् उपार्जितवान्?** 2

उत्तरम् – निर्धनः जनः भूरि परिश्रम्य किञ्चिद् वित्तम् उपार्जितवान्।

**अथवा**

**भूकम्पस्य केन्द्रबिन्दुः कः जनपदः आसीत्?**

उत्तरम् – भूकम्पस्य केन्द्रबिन्दुः कच्छ जनपदः आसीत्।

**प्रश्न 10. स्वस्थजीवनाय कीदृशे वातावरणे भ्रमणीयम्?** 2

उत्तरम् – स्वस्थजीवनाय खगकुलकलरव-गुञ्जितवनदेशे भ्रमणीयम्।

**अथवा**

**मीनः कदा दीनां गतिं प्राप्नोति?**

उत्तरम् – सरोवरस्य सङ्कोचम् अञ्चति मीनः दीनां गतिं प्राप्नोति।

**प्रश्न 11. रेखाङ्कित-पदमाधृत्य प्रश्ननिर्माणं कुरुत ( केचित द्वे ) –** 2

1. व्याघ्रं दृष्ट्वा धूर्तः शृगालः अवदत्।
2. न्यायाधीशः बंकिमचन्द्रः आसीत्।
3. सिंहः वानराभ्यां स्वरसायाम असमर्थः एवासीत्।
4. मयूरस्य नृत्यं आराधना प्रकृते।

उत्तरम् – 1. कम् दृष्ट्वा धूर्तः शृगालः अवदत्?
2. न्यायाधीशः कःआसीत्?
3. सिंहः वानराभ्याम् **कस्यां** असमर्थः एवासीत्?
4. मयूरस्य नृत्यं **कस्याः** आराधना?

**प्रश्न 12. अधोलिखितानि वाक्यानि कः कम् प्रति कथयति –** 2

1. त्वं वनराजः भवितुं तु सर्वथाऽयोग्यः।
2. स्वामिन्! यत्रास्ते सा धूर्ता तत्र गम्यताम्।
3. तस्या द्वे नाम्नी।

| उत्तरम् – | कः | कम् प्रति |
|---|---|---|
| 1. | एक वानरः | सिंहः प्रति |
| 2. | जम्बुकः | व्याघ्रः प्रति |
| 3. | लवः | विदूषकम् प्रति |

**प्रश्न 13. प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्य-पुस्तकस्य सुभाषितएकं लिखत।** 2

उत्तरम् –

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति॥

**प्रश्न 14. अधोलिखितेपु अशुद्ध वाक्यानां शुद्धिः करणीया ( केचित द्वे ) –** 2

1. सैनिकः अश्वेन पतति।
2. हिमालयेन/हिमालये/गङ्गा प्रभवति।
3. शिवं नमः।
4. माता बालकं दुग्ध ददाति।

उत्तरम् – 1. सैनिकः अश्वात् पतति।
2. हिमालयात् गङ्गा प्रभवति।
3. शिवाय नमः।
4. माता बालकाय दुग्धं ददाति।

**प्रश्न 15. प्रदत्ते शब्दैः रिक्तस्थानपूर्तिं कुरुत – ( कैचित द्वै ) –** 2

**( परमो, स्थितप्रज्ञः, एव, बहिः )**

1. पर्यावरणस्य संरक्षणम् .......... प्रकृतेः आराधना।
2. भूकम्पित-समये ........... गमनमेंव उचितं भवति।
3. बकः अविचलः .................. इव तिष्ठति।
4. आचारः ............................. धर्मः।

उत्तरम् – 1. एव, 2. बहिः, 3. स्थितप्रज्ञः, 4. परमो।

**प्रश्न 16. अधोलिखितानि वाक्यानि घटनाक्रमानुसारेण योजयते –** 2

**(1) व्याघ्रः व्याघ्रमारीइयमिति मत्वा पलायितः।**

**(2) मार्गे सा एकं व्याघ्रम् अपश्यत्।**

**(3) व्याघ्रं दृष्ट्वा सा पुत्रौ ताडयन्ती उवाच-अधुना एकमेव व्याघ्र विभज्य भुज्यताम्।**

**(4) बुद्धिमती पुत्रद्वयेन उपेता पितुर्गहं प्रति चलिता।**

**(5) त्वं मानुषात् विभेषि।**

उत्तरम् – (1) बुद्धिमती पुत्रद्वयेन उपेता पितुर्गृहं प्रति चलिता।

(2) मार्गे सा एकं व्याघ्रम् अपश्यत्।

(3) व्याघ्रं दृष्ट्वा सा पुत्रौ ताडयन्ती उवाच-अधुना एकमेव व्याघ्रं विभज्य भुज्यताम्।

(4) व्याघ्र: व्याघ्रमारी इयमिति इति मत्वा पलायित:।

(5) त्वं मानुषात् बिभेषि।

प्रश्न 17. वाच्य परिवर्तनं कृत्वा लिखत ( केचित द्वे ) - 2

1. क्रुद्ध: सिंह: इतस्तत: धावति गर्जति च।

2. क: छायां निवारयति।

3. स: फलानि खादितवान्।

उत्तरम् - 1. क्रुद्धेन सिंहेन इतस्तत: धाव्यते गर्ज्यते च।

2. केन छाया निवार्यते?

3. तेन फलानि खादितानि।

प्रश्न 18. अधोलिखित गद्यांशेषु प्रश्नानामुत्तराणि संस्कृत भाषायां देयानि - 3

अस्ति देउलाख्यो ग्राम:। तत्र राजसिंह: नाम राजपुत्र: वसति स्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रं ददर्श। सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्ट्र्यात् पुत्रौ चपेटया प्रहृत्य जगाद - "कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथ:? अयमेकस्तावद्विभज्य भुज्यताम्। पश्चाद् अन्यो द्वितीय: कश्चिल्लक्ष्यते।"

इति श्रुत्वा व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रो भयाकुलचित्तो नष्ट:।

प्रश्ना: - (i) राजसिंहस्य भार्या कुत्र गता?

उत्तरम् - राजसिंहस्य भार्या पितुर्गृहम् गता।

(ii) आगच्छन्तं व्याघ्रं दृष्ट्वा भार्या किम् अकरोत्?

उत्तरम् - आगच्छन्तम् व्याघ्रम् दृष्ट्वा धाष्ट्र्यात् पुत्रौ चपेटया प्रहृत्य उक्तवती - "कथम् एकैकशो व्याघ्रभक्षणाय कलहं कुरुथ:? अयम् एक: तावत् विभज्य भुज्यताम्। पश्चाद् अन्यो द्वितीय: कश्चिल्लक्ष्यते।"

(iii) ग्रामस्य नाम किमस्ति?

उत्तरम् - देउलाख्यो ग्राम:।

अथवा

कश्चित् कृषक: बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्। तयो: बलीवर्दयो: एक: शरीरेण दुर्बल: जवेन गन्तुमशक्तश्चासीत्। अत: कृषक: तं दुर्बलं वृषभं तोदनेन नुदन् अवर्तत। स: ऋषभ: हलमूढ्वा गन्तुमशक्त: क्षेत्रे पपात। क्रुद्ध: कृषीवल: तमुत्थापयितुं बहुवारम् यत्नमकरोत्। तथापि वृष: नोत्थित:।

प्रश्ना: - (i) कृषक: काभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्?

उत्तरम् - कृषक: बलीवर्दाभ्यां क्षेत्र कर्षणं कुर्वन्नासीत्।

(ii) तयो: बलीवर्दयो: एक: कीदृश: आसीत्?

उत्तरम् - तयो: बलीवर्दयो: एक शरीरेण दुर्बल: जवेन गन्तुमशक्तश्चासीत्।

(iii) मातु: सुरभे: नेत्राभ्यां कानि आविरासन्?

उत्तरम् - मातु: सुरभे: नेत्राभ्यां श्रुणि आविरासन्।

प्रश्न 19. अधोलिखित पद्यांशेषु प्रश्नानां उत्तराणि संस्कृत भाषायां लिखत - 3

गुणी गुणं वेत्ति न वेत्ति निर्गुणो,
बली बलं वेत्ति न वेत्ति निर्बल:॥
पिको वसन्तस्य गुणं न वायस:,
करी च सिंहस्य बलं न मूषक:॥

प्रश्ना: - (i) गुणी किं वेत्ति?

उत्तरम् - गुणी गुणं वेत्ति।

(ii) बली कि वेत्ति?

उत्तरम् - बली बलं वेत्ति।

(iii) सिंहस्य बलं किं न जानति?

उत्तरम् - सिंहस्य बलं मूषक: न जानति।

अथवा

कज्जलमलिनं धूमं मुञ्चति शतशकटीयानम्।
वाष्पयानमाला संधावति वितरन्ती ध्वानम्॥
यानानां पङ्क्तयो ह्यनन्ता: कठिनं संसरणम्।

प्रश्ना: - (i) केषाम् अनन्ता: पङ्क्तय: धावन्ति?

उत्तरम् - यानानां अनन्ता: पङ्क्तय: धावन्ति।

(ii) ध्वानम् केषाम् कुरुत:?

उत्तरम् - ध्वानम् शतशकटीयानम् संधावति कुरुत:।

(iii) संसरणम् कठिनम् किमर्थम् भवति?

उत्तरम् - अनन्ता: यनानां पंक्तय: अत: संसरणम् कठिनम् भवति।

प्रश्न 20. अधोलिखित नाट्यांशेषु प्रश्नानां उत्तराणि संस्कृत भाषायां लिखत - 3

काक: - अरे! अरे! किं जल्पसि? यदि अहं कृष्णवर्ण: तर्हि त्वं किं गौराङ्ग:? अपि च विस्मर्यते किं यत् मम सत्यप्रियता तु जनानां कृते उदाहरणस्वरूपा – 'अनृतं वदसि चेत् काक: दशेत्' – इति प्रकारेण। अस्माकं परिश्रम: ऐक्यं च विश्वप्रथितम्। अपि च काकचेष्ट: विद्यार्थी एव आदर्शच्छात्र: मन्यते।

पिक: - अलम् अलम् अतिविकत्थनेन। किं विस्मर्यते यत् -

काक: कृष्ण: पिक: कृष्ण: को भेद: पिककाकयो:।
वसन्तसमये प्राप्ते काक: काक: पिक: पिक:॥

प्रश्नाः - (i) काकचेष्टः विद्यार्थी कीदृशः छात्रः मन्यते?

उत्तरम् - काकचेष्टः विद्यार्थी आदर्शः छात्रः मन्यते।

(ii) पिककाकयोः भेदः कदा जायते?

उत्तरम् - वसन्तसमये प्राप्ते पिककाकयोः भेदः जायते।

(iii) काकः स्वविषयं किम् कथयति?

उत्तरम् - काकः स्वविषये कथयति काक चेष्टः विद्यार्थी एव आदर्शच्छात्रः मन्यते।

अथवा

रामः - एष भवतोः सौन्दर्यावलोकजनितेन कौतूहलेन पृच्छामि-क्षत्रियकुल-पितामहयोः सूर्य-चन्द्रयोः को वा भवतोर्वंशस्य कर्त्ता?

लवः - भगवान् सहस्त्रदीधितिः।

रामः - कथमस्मत्समानाभिजनौ संवृत्तौ?

विदूषकः - किं द्वयोरप्येकमेव प्रतिवचनम्?

लवः - भ्रातरावावां सोदर्यौ।

रामः - समरूपः शरीरसन्निवेशः। वयसस्तु न किञ्चिदन्तरम्।

लवः - आवां यमलौ।

रामः - सम्प्रति युज्यते। किं नामधेयम्?

प्रश्नाः - (i) कुशलवयोः वंशस्य कर्त्ता कः?

उत्तरम् - कुशलवयोः वंशस्य कर्त्ता भगवन् सहस्त्रदीधितिः।

(ii) कथं शरीरसन्निवेशः?

उत्तरम् - समरूपः शरीरसन्निवेशः।

(iii) 'भ्रातरावावां सोदर्यौ' इति कः कथयति?

उत्तरम् - 'भ्रातरावावां सोदर्यौ' इति लवः कथयति।

प्रश्न 21. अधोलिखित अपठित गद्यांशं सम्यक् पठित्वा प्रश्नानां उत्तराणि संस्कृभाषायाः लिखत - **4**

शरीरं धर्मस्य प्रथमं साधनम् अस्ति - 'शरीरमाद्यं खलु धर्मसाधनम्'। शरीरस्य आरोग्यं व्यायामेन सिध्यति। यः व्यायामं करोति तस्य प्राणशक्तेः आपदः स्वयमेव दूरं गच्छन्ति। व्यायामेन शरीरे शुद्धरक्तसञ्चारः भवति। इन्द्रियाणि सुस्थानि स्वस्थानि च भवन्ति। जठराग्निः दीप्तः भवति। परिवृद्धम् उदरं सङकोचं गच्छति। मस्तिष्कम् उर्वरं भवति। अस्मिन् लोके जनैः वयोऽनुसारं कोऽपि व्यायामः अवश्यं करणीयः।

प्रश्नाः (i) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।

(ii) शरीरं कस्य प्रथमं साधनम्?

(iii) मस्तिष्कम् किं भवति?

(iv) कानि सुस्थानि स्वस्थानि च भवन्ति?

उत्तरम् - (i) 'शरीरमाद्यं खलु धर्मसाधनम्'।

(ii) शरीरस्य व्यायामेन प्रथमं साधनम्।

(iii) मस्तिष्कम् उर्वरं भवति।

(iv) इन्द्रियाणि सुस्थानि स्वस्थानि च भवन्ति।

प्रश्न 22. स्वप्राचार्यस्यकृते अवकाशार्थम् एकं प्रार्थनापत्रम् संस्कृत भाषायां लिखत। **4**

उत्तरम् -

आदरणीयाः प्राचार्य महोदयाः

विषय - अवकाशप्राप्तये निवेदनम्।

सविनयं निवेदनम् अस्ति यत् अहं तीव्रज्वरेण आक्रान्तः अस्मि। एतस्मात् कारणात् विद्यालयम् आगन्तुम् असमर्थः अस्मि। अतः मह्यम् पञ्चदिवसानां अवकाशं प्रदाय माम् अनुगृह्णन्तु। एतयोः दिवसयोः अध्ययनस्य या हानिः भविष्यति ताम् दूरीकर्तुम् यतिष्ये।

धन्यवादः

दिनाङ्क : 20-8-202X

भवदीयः शिष्यः

करणः

अथवा

स्वभ्रातुः जन्मदिनोत्सवस्य कृते स्वमित्राय आमंत्रणपत्रम् संस्कृते लिखत।

उत्तरम् -

परीक्षाभवनात्

ग्वालियर नगरम्

दिनाङ्क : 03-02-202X

प्रियमित्र राघव,

मधुरस्मृतयः

अत्र कुशलं तत्रास्तु। भवान् इदम् ज्ञात्वा अत्यधिकं हर्षितः भविष्यति यत् मम/मम् भ्राताः जन्मदिवसः आगामिरविवासरे भविष्यति। प्रतिवर्षमिव मम जनकेन लघु समारोहस्य आयोजनम्; पूजायाः कार्यक्रमः पञ्चवादने भविष्यति। सर्वाणि अपि मम मित्राणि आगमिष्यन्ति। तुभ्यम् अपि निमन्त्रणम् प्रेषयामि। अतएव समये आगत्य समारोहस्य शोभाम् वर्धस्व।

तव अभिन्नम् मित्रम्

रमेशः

प्रश्न 23. अधोलिखितेषु एकं विषयं स्वीकृत्य संस्कृते निबंधं लिखत - **4**

1. पर्यावरणम् 2. हिमालयः

3. महाकवि कालिदासः 4. संस्कृत भाषाया महत्त्वम्

उत्तर - 1. पर्यावरणम्

1. परि + आवरणम् इति पर्यावरणम्। 2. पर्यावरणं जीवनस्य आवश्यकं अंगं अस्ति। 3. स्वस्थ-पर्यावरणे एव स्वस्थः विकासः भवति। 4. पर्यावरणस्य संरक्षणं अस्माकं कर्तव्यं अस्ति। 5. प्राचीन काले पर्यावरणं विशुद्धं आसीत्। 6. अधुना पर्यावरण प्रदूषण समस्या अति विकराला अस्ति। 7. वृक्षानां अभावः पर्यावरण प्रदूषणस्य प्रमुख कारणम् अस्ति। 8. जनाः स्वार्थ-प्रमादवशात् पर्यावरणं प्रदूषयन्ति। 9. पर्यावरणस्य अर्थे जलं पवनं च विशुद्धं भवितव्यम्। 10. शासनम् अपि पर्यावरणस्य रक्षाय कृतसंकल्पः अस्ति।

## 2. हिमालयः

1. हिमालयः एकः हिमवन्तः उच्चतमः च भूधरः अस्ति। 2. अयं हिमस्य आलयः अस्ति अतः हिमालयः कथ्यते। 3. अयं पर्वतेषु श्रेष्ठतमः अनुपमः च अस्ति। 4. शिवस्य पत्नी पार्वती हिमालयस्य पुत्री अस्ति। अतः अयम् पार्वती पिता अस्ति। अस्मिन् नगाधिराजे महादेवः विराजते अतः अयम् नगः देवात्मा अस्ति। 5. अस्मिन् पर्वते बहूनि उन्नतानि मनोहराणि च शिखराणि सन्ति। 6. गंगा, यमुना, ब्रह्मपुत्रादि नद्यः हिमालयात् प्रभवन्ति। 7. गंगोत्री, यमुनोत्री, बदरीनाथः केदारनाथः तीर्थस्थानानि अत्र सन्ति। 8. हिमालयः देवभूमिः अस्ति अतः अत्र तपसाधकाः तपस्यां कुर्वन्ति। 9. अयं नगाधिराजः भारतस्य उत्तरीसीमा अस्ति। 10. अयं दिशिदेवात्मा पृथिव्याः मानदण्डः अस्ति।

## 3. महाकवि कालिदासः

1. कालिदासो भारतस्य श्रेष्ठतमः कविः अस्ति। 2. सः न केवलं भारतस्य प्रत्युत विश्वस्य श्रेष्ठतमः कविः। 3. तेन विरचिताः सप्त-ग्रन्थाः अतीव प्रसिद्धाः। 4. तेषु द्वे महाकाव्ये रघुवंशं कुमारसंभवं च। 5. तेन मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलं, नामानि त्रीणि नाटकानि अपि रचितानि। 6. अनेन विरचितं, साहित्यं विदेशेषु अपि सम्माननीयस्थानं प्राप्तम्। 7. महाकवेः भाषा अत्यन्त-सरला मनोहरा च वर्तते। 8. अस्य काव्यं शृंगाररसप्रधानः प्रकृतिप्रधानचास्ति अस्ति। 9. कालिदासस्य उपमाः अतीव प्रसिद्धाः। 10. उज्जयिन्यां प्रतिवर्षं कालिदास-महोत्सवो भवति।

## 4. संस्कृत भाषाया महत्त्वम्

1. संस्कृतभाषा विश्वस्य सर्वासु भाषासु प्राचीनतमा सर्वोत्तमसाहित्यसंयुक्ता चास्ति। 2. संस्कृता परिशुद्धा व्याकरणसम्बन्धिदोषादिरहिता संस्कृतभाषेति निगद्यते। 3. प्राचीने समये एषैव भाषा सर्वसाधारणा आसीत्। 4. सर्वे जनाः संस्कृतभाषाम् एव वदन्ति स्म। 5. एषा एव अस्माकं पूर्वजानाम् आर्याणां सुलभा, शोभना, गरिमामयी च वाणी। 6. संस्कृतभाषायामेव विश्वसाहित्यस्य सर्वप्राचीनग्रन्थाः चत्वारो वेदाः सन्ति येषां महत्त्वमद्यापि सर्वोपरि वर्तते। 7. भास-कालिदास-अश्वघोष-भवभूति-दण्डि-सुबन्धु-बाण-जयदेव प्रभृतयो महाकवयो नाटकाराश्च संस्कृतभाषायाः एव। जीवनस्य सर्वसंस्कारेषु संस्कृतस्य प्रयोगः भवति। 8. अधुनाऽपि सङ्गणकस्य कृते संस्कृतभाषा अति उपयुक्ता अस्ति। 9. संस्कृतभाषैव भारतस्य प्राणभूताभाषा अस्ति राष्ट्रस्य ऐक्यं च साधयति। 10. भारतीय गौरवस्य रक्षणाय एतस्याः प्रसारश्च सर्वैरेव कर्त्तव्यः अत एव उच्यते - 'संस्कृतिः संस्कृताश्रिता।'